यम उवाच ।
वैष्णवं तद्व्रतं विप्र ! कुरु गत्वा निजालयम् ।
विधानं शृणु विप्रेन्द्र ! द्वादशी यादृशी भवेत् ॥
वैशाखे शुक्लपक्षस्य द्वादशी वैष्णवी तिथिः ।
तस्यां सुशीतलजलैः स्नापयेत् केशवं प्रभुम् ॥
पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैर्विधानतः ॥
नैवेद्यैर्विविधैश्चैव ताम्बूलैरथ वाससा ॥
जप्त्वा तु वैष्णवं मन्त्रं दण्डवत् प्रणमेत्ततः ।
दद्याद्द्विजेभ्यो विधिवत् कुम्भांस्तोयसमन्वितान् ।
प्रथमेऽब्दे चतुःकुम्भान् दद्याल्लवणसंयुतान् ॥
शुक्लवस्त्रावृतमुखानुपवीतसुसंयुतान् ।
धनुर्व्वाणसमायुक्तान् सभोज्यदक्षिणान्वितान् ॥
द्वितीयेऽब्दे घटान्दद्याद्दधिशर्करसंयुतान् ।
तृतीये द्वादश घटान् तिलमोदकसंयुतान् ॥
चतुर्थे षोड़शघटान् दुग्धलड्डुकसंयुतान् ।
दद्यात् संपूज्य देवेशं द्विजातिभ्यः प्रयत्नतः ॥
दक्षिणां शक्तितो दद्यात् भोज्यञ्चैव विशेषतः ।
यत्र कुत्रापि संगच्छेन्न कुत्रापि तृषान्वितः ॥
ततो द्विजो गृहं गत्वा चकार द्वादशीव्रतम् ॥
अन्ते जगाम स्वर्लोकं वैष्णवं पदमुत्तमम् ॥
पिपीतकीति नाम्नातो विख्यातो वैष्णवी तिथिः ।
नरो यः कुरुते भक्त्या नारी वा भक्तिसंयुता ।
इह पुत्त्रादिसम्पन्ना धनधान्यसुतान्विता ॥”
इति भविष्यपुराणे पिपीतकीव्रतकथा समाप्ता ॥

पिपीलकः, पुं, (अपिपीलतीति । अपि+पील स्तम्भने +ण्वुल् । अपेरल्लोपः ।) पीलकः । इति हेमचन्द्रः । ४ । २७२ ॥ डेंओया पिंपीड़ा इति भाषा ॥

पिपीलिका, स्त्री, (पिपीलक+टापि अत इत्वम् ।) हीनाङ्गी । इति हेमचन्द्रः । ४ । २७१ ॥ क्षुद्र पिँपीड़ा इति भाषा ॥ तत्पर्य्यायः । पिपीलिकः २ पिपीलः ३ पीलकः ४ । इति शब्दरत्नावली ॥ पिपीली ५ पिपिली ६ स्त्रीसंज्ञा ७ । इति राजनिर्घण्टः ॥ हीरा ८ । इति त्रिकाण्डशेषः ॥ (यथा, हरिवंशे । २४ । ४ ।
“श्रुत्वा तु याच्यमानां तां क्रुद्धां स्वर्णपिपीलिकाम् ।
ब्रह्मदत्तो महाहासमकस्मादेव चाहसत् ॥”)

पिपीली, स्त्री, (अपिपीलतीति । पील्+अच् । अपेरलोपः । ततो गौरादित्वात् ङीष् ।) पिपीलिका । इति राजनिर्घण्टः ॥

पिप्पटा, स्त्री, खाद्यद्रव्यविशेषः । तत्पर्य्यायः । गुड़शर्करा २ । इति त्रिकाण्डशेषः ॥

पिप्पलं, क्ली, (पीयते इति । पा+अलच् । पृषोदरादित्वात् साधुः ।) जलम् । वस्त्रच्छेदभेदः । इति मेदिनी । ले, १११ ॥

पिप्पलः, पुं, (पिप्पलं जलं सिच्यमानत्वेनास्त्यस्य मूलावच्छेदे इति । पिप्पल+“अर्श आदिभ्योऽच् ।” ५।२।१२७ । इत्यच् ।) अश्वत्थवृक्षः । (यथा, महाभारते । २ । २१ । ८ ।
“वनराजीस्तु पश्येमाः पिप्पलानां मनोरमाः ।
लोध्राणाञ्च शुभाः पार्थ ! गौतमौकःसमीपजाः ॥”) निरंशुकः । पक्षिभेदः । इति मेदिनी । ले, ११२ ॥ * ॥ अश्वत्थस्वरूपं यथा,—

नारद उवाच ।
“अनायासेन यन्मर्त्त्यः सर्व्वान् कामानवाप्नुयात् ।
सर्व्वदेवात्मकश्चैव तन्मे ब्रूहि पितामह ! ॥
ब्रह्मोवाच ।
शृणु नारद ! यत्नेन शुद्धं सर्व्वात्मकं गुरुम् ।
प्रदक्षिणीकृत्य नित्यं नराणां सर्व्वकामदम् ॥
पूजयेत् परया भक्त्या सर्व्वसिद्धियुतो भवेत् ।
अश्वत्थं पूजयेद्विप्र ! सर्व्वसिद्धिविधायकम् ॥*॥
अश्वत्थदक्षिणे रुद्रः पश्चिमे विष्णुरेव च ।
ब्रह्मा चोत्तरतस्तस्य पूर्व्वे चेन्द्रादिदेवताः ॥
स्कन्धे स्कन्धे च पत्रेषु ब्राह्मणा ऋषयः स्मृताः ।
तस्य मूले सर्व्ववेदाः शृङ्गा तस्य इमाश्रिता ॥
नदीनदाः सागराद्याः पूर्व्वस्यान्दिशि संस्थिताः ।
लोकधर्म्मान् समाश्रित्य तस्मात्तं सेवयेन्नरः ॥
पुराणस्मृतिमन्त्रेभ्यः सारमुद्धृत्य सञ्चितम् ।
निष्ठाप्रतिष्ठितं सम्यगश्वत्थं सेवयेन्नरः ॥
त्वं क्षीरी फलितश्चैव शीतलश्च वनस्पते ! ।
त्वामाराध्य नरो हन्यात् दैहिकाधिष्ठितं मलम् ॥
अश्वत्थ ! यस्मात् त्वयि वृक्षराज !
नारायणस्तिष्ठति सर्व्वकालम् ।
अतः शुचिस्त्वं सततं तरूणां
विशेषतोऽरिष्टविनाशनोऽसि ॥
क्षीरोदमथने चैव यथा श्रीस्त्वामुपासते ।
सत्येन तेन वृक्षेन्द्र ! आशीर्मयि निषिञ्चतु ॥
एकादशोऽसि रुद्राणां वसूनाञ्चाष्टमस्तथा ।
नारायणोऽसि देवानां वृक्षाणामसि पिप्पलः ॥
अग्निगर्भस्त्वमश्वत्थ ! देवगर्भ, प्रजापतिः ।
हरिर्यथैव श्रीगर्भो यज्ञगर्भ ! नमोऽस्तु ते ॥
अरातेरग्निरश्वत्थ ! परापर ! नमोऽस्तु ते ।
निर्वाते त्वभिवर्षन्तु स्वस्ति तेऽस्तु नमोऽस्तु ते ॥
अक्षिस्पन्दं भुजस्पन्दं दुःस्वप्नं दुर्निरीक्षितम् ।
शत्रूणाञ्च समुत्थानमश्वत्थ ! शमयाशु मे ॥
यं स्पृष्ट्वा मुच्यते रोगैः सर्व्वपापैः प्रमुच्यते ।
समाश्लिष्य च दीर्घायुस्तमश्वत्थं नमाम्यहम् ॥
अश्वत्थ ! सुमहाभाग ! सर्व्वदा प्रियदर्शन ! ।
दिव्यान्नभोजनं देहि शत्रूणाञ्च पराजयम् ॥
आयुः प्रजां धनं धान्यं सौभाग्यं सर्व्वदा सुखम् ।
देहि देव महावृक्ष ! त्वामहञ्चाभिवादये ॥
अश्वत्थ ! देवमूलस्कन्धविभिः प्रोच्यते सदा ॥
ब्रह्महा गुरुहा चैव दरिद्रो व्याधिपीड़ितः ।
आवृत्य दशलक्षन्तु शुद्धः पापातिगो भवेत् ॥
ब्रह्मचारी हविष्याशी अधःशायी जितेन्द्रियः ।
पापापहन्ता मर्त्त्यस्तु व्रतमेतत् समाचरेत् ॥
एकहस्तं द्विहस्तं वा कुर्य्याद्गोमयलेपनम् ।
अश्वत्थे स्थापिते यस्तु मूले स्नपनमाचरेत् ॥
धनायुःसन्ततैर्वृद्धो नरकात्तारयेत् पितॄन् ॥
अश्वत्थमूलमासाद्य शाकेनान्नोदकेन वा ।
एकं वा भोजयेद्विप्रं कोटि कोटि फलं भवेत् ॥
अश्वत्थमूलमासाद्य तपो होमः सुरार्च्चनम् ।
अक्षयं मुनिशार्दूल ! ब्रह्मणो वचनं यथा ॥
एवं समर्च्चितोऽश्वत्थः सर्व्वसौख्यप्रदो भवेत् ।
यज्ञार्थं छेदितोऽश्वत्थः सर्व्वारोग्यप्रदो भवेत् ॥
अश्वत्थः पूजितो येन पूजिताः सर्व्वदेवताः ।
अश्वत्थश्छेदितो येन छेदिताः सर्व्वदेवताः ॥
अन्तःशुद्धः सुसन्तुष्टोऽश्वत्थो देवमयो गुरुः ।
स सेव्यः पूजनीयश्च गुणत्रयविनाशकः ॥
भृग्वर्कवारे भौमे च मध्याह्ने निशि सन्ध्ययोः ।
अश्वत्थदर्शनं कार्य्यं कुलक्षयभयात्मभिः ॥ * ॥
अश्वत्थस्य जले यस्य छाया तिष्ठति कुत्रचित् ।
तत् प्रयागसमं तीर्थं तत्र सन्निहितो हरिः ॥
तस्मात् कार्त्तिकमासे च पूर्ब्बोक्तविधिना मुने ! ।
अश्वत्थं सेचयेद्विद्वान् संप्रदक्षिणमादिशेत् ॥
पापोपहतमर्त्यानां पापनाशो भवेद्ध्रुवम् ।
सकामो लभते कामं निष्कामो मोक्षमाप्नुयात् ॥
यः पठेत् शृणुयाद्वापि अश्वत्थस्य समीपतः ।
सर्व्वान् कामानवाप्नोति विष्णुसायुज्यमाप्नुयात् ॥”
इति पाद्मोत्तरखण्डे १२६ अध्यायः ॥

ऋषय ऊचुः ।
“कथं त्वयाश्वत्थवटौ गोब्राह्मणसमौ कृतौ ।
सर्व्वेभ्योऽपि तरुभ्यस्तौ कथं पूज्यतमौ कृतौ ॥
सूत उवाच ।
अश्वत्थरूपी भगवान् विष्णुरेव न संशयः ।
रुद्ररूपी वटस्तद्वत् पलाशो ब्रह्मरूपधृक् ॥
दर्शनस्पर्शसेवासु ते वै पापहराः स्मृताः ।
दुःखापद्व्याधिदुष्टानां विनाशकारिणो ध्रुवम् ॥
ऋषय ऊचुः ।
कथं वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ।
एतत् कथय सर्व्वज्ञ ! संशयोऽत्र महान् हि नः ॥
सूत उवाच ।
पार्व्वतीशिवयोर्द्देवैः सुरतं कुर्व्वतोः किल ।
अग्निं ब्राह्मणवेशेन प्रेष्य विघ्नः कृतः पुरा ॥
ततस्तु पार्व्वती क्रुद्धा शशाप त्रिदिवौकसः ।
रेतःसेकसुखभ्रंशकम्पमाना तदा रुषा ॥
पार्व्वत्युवाच ।
क्रिमिकीटादयोऽप्येते जानन्ति सुरतेः सुखम् ।
तस्मान्मम सुखभ्रंशाद्यूयं वृक्षत्वमाप्स्यथ ॥
सूत उवाच ।
एवं सा पार्व्वती देवी अशपत् क्रुद्धमानसा ।
तस्माद्वृक्षत्वमापन्ना ब्रह्मविष्णुमहेश्वराः ॥
तस्मादिमौ विष्णुमहेश्वरावुभौ
बभूवतुर्ब्बोधिवटौ सुरेश्वराः ! ।
बोधिस्त्वयं चार्कदिनं विनैव
नस्पृश्यतामर्कजवारयोगात् ॥
ऋषय ऊचुः ।
अस्पृश्यत्वं कथं यातः सूत ! बोधितरुः स्वयम् ।
स्पृश्यत्वञ्च कथं प्राप्तस्तथायं शनिवासरे ॥
सूत उवाच ।
समुद्रमथनाद्यानि रत्नान्यापुः सुरोत्तमाः ।
श्रियञ्च कौस्तुभं तेषु विष्णवे प्रददुः सुराः ॥
यावदङ्गीचकाराशौ लक्ष्मीं भार्य्यार्थमात्मनः ।
तावत् विज्ञापयामास लक्ष्मीस्तं चक्रपाणिनम् ॥